# Shri Ramakrishna ratrikam

# શ્રીરામકૃષ્ણારાત્રિકમ્

## Document Information

Text title : Shri Ramakrishna ratrikam

File name : rAmakRRiShNArAtrikam.itx

Category : deities_misc, gurudev, rAmakRiShNa, AratI

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણારાત્રિકમ્

ભવ-બન્ધન-ભય-ખણ્ડન ! શુભ-વન્દન ! વન્દે ।
ગત-રઞ્જન ! ભવ-ભઞ્જન ! નિહિતનયન ! મન્દે ॥ ૧॥

ગુણમયવર ! નિર્ગુણનર ! નવમાનવ રૂપિન્ ।
અઘદૂષણ-ગણમોચન ! જગભૂષણ-રૂપિન્ ॥ ૨॥

જ્ઞાનાઞ્જન વિમલનયન ! વીક્ષ્યમોહનાશિન્ ।
ભાસ્વર-સુભાવ-સાગર ! શશિ-સુવિશદહાસિન્ ॥ ૩॥

ભક્તાર્ચિત ચરણ યુગલ ! ભવસાગર તારક ।
જૃમ્ભિતયુગ-ઈશ્વર ! જગદીશ્વર ! ન્યાયકારક ॥ ૪॥

તવ કૃપયા પ્રાપ્ત - સમાધાનમનાઃ પશ્યન્ ।
અસ્મિ કર્મકાઠિન્યં કરુણાઘન ! હૃષ્યન્ ॥ ૫॥

ભવતારણ-પ્રાણાર્પણ ! ભયહર ! કલિકૃન્તન ।
અતિનિન્દિત-કરણરાગ ! વઞ્ચન કામકાઞ્ચન ॥ ૬॥

ત્યાગીશ્વર ! હે નરવર ! દેહપદામોહ ।
નિર્ભય ! ગત-સંશય ! દૃઢ઼નિશ્ચય ! ગતલોહ ॥ ૭॥

નિષ્કારણ ! ભક્તશરણ ! ત્યક્તજાતિમાન ।
સમ્પન્મમ તવ ચરણં ભવગોષ્પદમાન ॥ ૮॥

પ્રેમાર્પણ સમદર્શન ! દુઃખમેતુ વિલયમ્ ।
તવ ગાનં ગતમાનં વિલસત્વવિલયમ્ ॥ ૯॥

નમો નમોઽવાઙ્માનસગોચર !
    મતિવચનૈકાધાર ।
જ્યોતિર્જ્યોતિષોઽપિ હૃત્કન્દર-
    તમસો વર -સંહાર ॥ ૧૦॥

ધિક્તાન્ ધિક્તાન્ વદતિ મૃદઙ્ગો
    યે ન પદે તે પ્રણતાઃ ।
ગાયન્ત્યેતે ભક્તજનાસ્તે
    હ્યારાત્રિકં પ્રવિનતાઃ ॥ ૧૧॥

જયતુ જયત્વારાત્રિકમેતત્
તવ શમ્ભો ! શિવ ! હર ! હર !
આનન્દેનાનુદિતમભવત્
ગાનમિદં તે શઙ્કર! ॥ ૧૨॥

ઇતિ ન્યાયાચાર્ય પં. શ્રીઆનન્દ ઝા-અનુવાદિતં શ્રીરામકૃષ્ણારાત્રિકં સમ્પૂર્ણમ્ ।
મૂલં સ્વામિવિવેકાનન્દવિરચિતં
યહ સ્વામી વિવેકાનન્દ જી દ્વારા રચિત “શ્રી શ્રી રામકૃષ્ણ-આરાત્રિક”
ભજન કા સંસ્કૃત અનુવાદ હૈ ।

Proofread by Aruna Narayanan

---

*Shri Ramakrishna ratrikam*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*